खे पुनः एकस्य चंद्रस्याब्जस्य वा श्रियाशोभया कृत्वा कदा कस्मिन्समये दिने रात्रौ वा न कांतमपि तु दिनरात्रौ
च चंद्रशोभया कमलशोभया च। शोभां चंद्रस्य शोभा रात्रावेव न दिने न कमलस्य शोभा दिने एव न तु रात्रौ भैमीमु

स-७

नै०टी० खं तु दिवा रात्रौ च सदृशो भमित्यर्थः। भैमीमुखं चंद्रस्य लक्ष्मीरूपेण निद्रेयै रात्रौ तस्मै प्रयच्छति दिने भीतत्वात्तस्याः एवं क-
१८ मलस्य लक्ष्मीरूपेण निद्रेयं दिने कं प्रयच्छति रात्रौ भीतत्वात्। अधुना दिने निद्रेयापि धनिना यदा याच्यते तदैव दातव्यं
भवति स्वापनीयं च भवति या वस्तु विद्यते तावन्मेव वस्तुसालंकारः क्रियते। दिवा चंद्रश्रीध्या रात्रौ कमलश्रीध्या-
व आत्मानमलंकरोतीत्यर्थः॥५६॥ अस्याइति। खलु स्त्रियेति॥ पद्मश्च चंद्रश्च तौ ताताः पितरौ जलात् मित्रात् अनु-
कुर्वादादर्शाच्च अभ्यर्थ्य अर्थात्प्रतिबिंबमेव याचित्वा अस्याः भैम्या मुखश्रीः प्रतिबिंबमेव सदृशो भमुखप्रतिबिंबलक्ष-
णो भवयाचितं क्रीयते याचितमंडनं करोति दिने रात्रौ च धत्तः धारयतः। जलोत्पन्नत्वात्पद्मस्य पिता जलं चंद्र-
त्वात् जलत्वादिगुणयोगात् दर्पणस्य चंद्रसखत्वात् पितृमित्राभ्यां याचितं दीयते। याचितकालंकारः कदाचिद्ध्रिय-
ते न सर्वदा। उदके प्रतिबिंबितं भैमीमुखं तदेव तरं जलं याचित्वा दिने कमले शोभते। दर्पणे यदा प्रतिबिंबितं भैमी-
मुखं तदेव दर्पणं मित्रं याचित्वा रात्रौ चंद्रः शोभते नान्यथैतयोः शोभेत्यर्थः। भैमीमुखप्रतिबिंबेनापि सदृशो-
यदा पद्मचंद्रौ न भवतस्तदा भैमीमुखसदृशौ कुतस्तरां न भवेतामपि तु न कुतोपीति भावः॥ यौ परस्परसमुद्वेय॥
याचितकं याचितमंत्रान्नमित्यर्थे अपमित्ययाचिताभ्यां कक्कुनाचितिकन्॥५७॥ अर्द्धपेति। अर्कायस्त्यौपप १८

त्यप्रियायतिघमानाः स्वप्रकाशेन नखरैर्यस्त्वीयं भावं ज्ञापयितुकामाः अंबुजिन्याः अंबुकेलौ जलक्रीडासमये भै
गृहे परस्त्रिभिर्नेत्रैः लक्ष्यामिति ज्ञातो भैम्या एव मुखस्य प्रियविस्तारिताः पद्मरूपा हस्ता याभिस्ताएवंभूताः सत्यः
भैमीयावंति। खलु त्येव्रज्ञते। अस्मत्पतिः सर्योऽधुनास मागमिष्यतीति त्वन्मुखशोभया पिरुविरोभवाम इति भैमी
मुखशोभां भैमी यावंत इत्यर्थः। कमलं भैमीवदनयोः सर्वथासाम्यं नास्ति विभावः॥ अन्यापि त्वामीनिह स्तंसार्य
दृकुसंज्ञया याचते। अन्यापि ह्यदीयमलेकारं स्वालंस्वालं करणार्थं हस्तौ प्रसार्य याचते। क्रीडासमयया वित
मवश्यं प्रगुणं दीयते। अकीयश्लाघकुडि· तिसंप्रदानचं तिष्ठमानाप्रकाशनस्पया स्वयोश्चित्वात्मनेपद
स्वीयं भावं ज्ञापयितुमिति हेतौ वाशानच्। याचिद्धिकर्मा॥ ५८॥ अस्याइति। अस्यामुखेनैव नित्यस्पर्द्धीसरा
स्पर्द्धमानश्चंद्रः विजित्यपराभय स्वलु निश्चितं ग्रस्त्यहठान्नह्यमानो वबद्ध्यमानएवाधुनापि तुष्यन्नपरिवेष
एवपाशोलंभनरज्जुर्यस्य चं विधः स्यात्तन्नवेत्त। नान्यथैतद्घटत इत्यर्थः। किं भूतेन मुखेन उद्घृन्नो नार्थमि ल
त्संलग्न कुंकुमं तदेव रोषभासः। अन्यापि स्पर्द्धमानं रोषारुणः सन्हठाद्विजित्य निबध्नाति मापि बद्धएवति
ष्ठतीति। खलु रुत्येव्रज्ञा यो वा नह्यमान इवेति॥ ५९॥ विधोरिति। विधिर्मो सि२ग्रतिमासे कुहू रात्रिषु नष्टं

स॰७
नै॰टी॰ डुकलामावास्यारात्रिषु विधोश्चंद्रस्य दिवं वशता निवर्त्तनि मंडलानि लोपे लोपं विलुप्य रश्मेगुरश्रीकं अवि
१८ नश्वरशोभं सिमं प्रत्यत्तहश्यमस्यामुखे इंदुमुखचंद्रमेकशेषमेकश्चासो शेषश्चेति तथाभूतं आस्थापयति स्था
पितवान् कौ अमावास्यायां सर्वथा चंद्रदर्शनाद्दियमुत्प्रेक्षा॥ हृत्यित्वा चंद्रबिंबानं अस्याननं अविनश्वरशोभ स
त्वात्तत्कार्यकारित्वाच्च अस्यामुखलक्षणे मि इंदुं स्थापितवानित्यर्थः॥ हृत्यित्वा रत्पि चंद्रो मुखतुल्यो न भवती
ति भावः। अन्योपि कारुः स्वयमेवकृतवस्तोश्च तुत्तमेसान्त्वा विनाश्य परसुंदरतरं वस्तु स्थापयति। अथ पवस
रूपाणां मध्ये कानि चित्सरूपाणि लुप्य कशेषः क्रियते यथैकः शिष्यते स तत्कार्यकारी भवति। लोपं शश्री भी
सु॰७ हृतोपणां मुख्ये तिगल्ल। ६० कपोलेति। मेनोभूः कामो रतिं प्रीतिं अथ च रतिं स्वस्त्रियां मवलंब्यांगीकृत्य तयास
ह इहभैमीमुखे कस्ति किंभूतः कपोललिखितात्पत्रात्पर्वत्रे स्त्रीरूपान्मकरात्सकेतुः सविद्धः तथा अत्रैव वध
नुमाजगद्विगीषु तथाऽधरेणाश्राछलहणे नमधुनाव संतेन कृत्वा रज्यपन्सानुरागो वयस्यो मित्रं यस्या॥
अधरेणाधरसे वंधिना मधुना रसेन कृत्वा रक्तपरशोणः वयसा मदनवृद्धिकरत्वादोषएव यस्य॥ भैमीमुख
सकलकामविकृदर्शनाद्देनावसतीत्युन्नीयत इत्यर्थः। भैमीमुखावलोकनात्सवलस्य कामस्यात्पत्तिर्भ १८

वर्तीति भावः॥ रज्यदिति कुपि रञ्जोरिति श्यन् परस्मैपदे॥ ६१॥ श्लोकपंचकेन कर्णौ वर्णयति॥ अस्याः कर्णौ
रतिश्च तत्पतिः कामश्च ताभ्यां निवेद्यस्यापहारस्य संवंधिनौ पूपौ मंडकौ ईदृक्किं विधिशिल्पं ब्रह्मनिर्माण
मितिसंभावना॥ एतदर्थं ब्रह्मणा किमेतौ निर्मितावित्यर्थः॥ किंभूतौ वियोगगलितायवाष्पा अश्रूणि तैर्वित
स्य पूजितस्य नेत्रपद्मस्य छद्मना व्याजेनार्पितौ वितीर्णौ उत्सर्गोदकदानार्थं पयः प्रसृते जलपुष्पयोस्ते॥ अ
श्रुदानजलनेत्रे च दानपुष्पयोः समीपे तिष्ठतः॥ नैवेद्यसमीपे जलपुष्पं भवतः॥ आकर्णनेत्रवादित्यर्थः॥
कर्णादर्शनादपि मद्भोत्पत्तिरिति भावः॥ पूपोऽपूपः पिष्टकः स्यादित्यमरः॥ निवेद्यं चार्हा पैप्पपत्र॥ ६२॥ इहेति
अतिवक्रः वैषम्या इति कुटिलः शृंगारगूढार्थयुक्तः दुर्बोधोऽनुद्ध्वरः॥ भ्रूयस्य वा॥ अत्र सम्हतस्य निर्घंदसार
भाग एव सुधाप्रवाहः अमृतप्रवाहः येन पथा इह अस्याः कंठकूपे ऽविशत् स पंथाः अस्या नैम्याः श्रवणयु
गे कर्णतांटकद्वयेप्रणालिकायोर्द्वेव अभिकर्णा ऽनूपं कर्णरंध्रं लक्षीकृत्य कर्णकूपसंमुखं वा धावति
या दृशी [illegible]लिका तादृश एव प्रवाहो भवति॥ अत्रेव ताटंकप्रणालिके कुंडलाकारत्वाद्वक्रे अतस्तत्र
गच्छन्प्रवाहोपि वक्रो युक्तः॥ यद्वा वक्रगामिनो हि प्रवाहस्य प्रणाली रेखा मार्गो वक्र एव भवति॥ स्तूपं वा

स॰७

नै॰टी॰ १९ नुधावति। अतो वक्रकर्णरेखारूपया प्रणाल्या कृत्वा वक्रः शास्त्रसुधाप्रवाहः कर्णयुगे भैम्या वा प्रविष्ट
इत्यर्थः। [illegible] सुधारूपा भवति। सकलकलाप्रवीणेयमिति भावः॥ निषध्यं दत्त इति निषध्य रूप स्थेप चा
द्यत्र अन्तर्विपर्ययमिति भ्यः स्वं दन्तरितिपदत्वं। अतिकर्णकूपमिति लक्षणे नाभिप्रतीति समासः॥ ६३॥ अ
स्या इति। अस्याः श्रुतीकर्णौ अष्टादशविद्याः से विभज्य द्विधा कृत्पय दर्द्धं अर्द्धं प्रत्येकं धारयामास तुः त
स्याद्वस्य कर्णौ ततः कर्णमध्ये उत्कीर्णो द्वृतागमीरा निम्नारेखायस्य ए वेभ्मतो नवसंख्याद्योतकः कोन
वाऽपूर्वाश्चर्यरूपसंख्या किं न अपि तु नवत्येव नवसंख्याकाविद्याः एका श्रुतिर्द्धारयति अपरापि नवसंख्या
का इति द्योतनार्थं ब्रह्मणैव कर्णमध्ये रेखा रूपाः एणदशार्द्धं गतान रूपान वाङ्का निर्मित इत्यर्थः। तस्ये
वार्द्धसंख्या नवाङ्किं नवाङ्क एवेत्यर्थः इति वान वृत्तिनिषेधार्थः॥ अस्याः कर्णरेखा नवाङ्कतुल्या सलक्ष
णेति भावः॥ ६४॥ मन्य इति। रतीशः कामः अमुनेतदीयनकर्णलतामयेन छिद्रुरेण दत्तरेणपाश
द्वयेन पाशरूपशास्त्रद्वयेन कृत्वा एकएवैकाकी पाशायस्येवं विधं वरुणं सुखेन विजिग्ये जितवान् इति
मन्ये। किं भूतः नं अंगी खता आयासततिः श्रमसाहित्यं येन। पाशद्वयेनैकस्यपाशस्य जयः सुकर इति १९

रू॰२

आयासरहितं कर्णयुगं दृष्ट्वाचरुरुण्द्र्यः सर्वेपि कामपरवशा भवंतीति भावः। पाशो बंधनशस्त्रयोरित्य
मरः। विजिगीषविपराभ्यां जेरिति तङ्॥६५॥ आत्मेति तस्माच्चतुर्दशस्थलाराद्दोषावाहृवायस्यएतादृशउवितः
युक्तः। अतः चतुर्भुजस्य श्रीकृष्णस्य तात तस्य पितुरात्मैव स्वरूपमेव आत्मा वै पुत्रनामासीति श्रुतेः। पितुः सदृश
पुत्रो युक्त एव। तस्य चतुर्भुजत्वं अस्याः भ्रुवौ स्तद्वापयोः भ्रूरूपयोर्द्वयोः स्मरधनुषोः विपिटे विस्तृते कर्णलते
ग्रा एवंवंशत्वागे शौवणुत्क्ष्माग्गेज्यपकिं। भम्या भ्रुवौ कामधनुषी करोमि मौर्व्यौ। द्वयोर्धनुषोर्मौर्वी द्वयं युक्तं। निर्व्या
पारस्य धनुषोः वतारिता मौर्वी कोणे तिष्ठति कर्णलते। अपि अधनुषोः कोणे विघत इत्यर्थः। विपिटा वित्यपि
पाठः॥६६॥ ग्रीवां वर्णयति। ग्रीवेति। स्ययं ग्रीवा उत्तेवाश्चर्यभूतेत्वार्थाद्भिभ्याः। अद्भुतत्वमेव विशेषणेनाह। किंभू
ता अवद्धा स्फटिकयाष्टी वा पुरोभागे नालंकृता पिः समुच्चये। मानवकेनार्द्धहाराख्यनहारविशेषेण वाप्र
साधिता लंकृता तथा आलिंग्यतामपि आलिंगनयोग्यमति सौंदर्यमवलंबमाना आश्रयंती अतएवमनुरूप
तां शोभनस्पर्शं भजत्याश्रयत एवंविधः अविलः ऊर्द्धकायः शरीरोर्द्धदेशो यया। कंबोः सौंदर्यास्तकलंकधारी
रोर्द्धदेशः शोभते। ईदृशी ग्रीवा नान्यस्या इत्यर्थः। अस्तु रूपता भाक् अति प्रियात्वात्प्राणरूपताभागित्वि

लोर्द्धं कायां ययां तिवा। याबद्दुशोभिता नसामाणावेकनवालेन प्रसाधितेति विरोधादाश्चर्यं। अथ वयालिंग्यतांम
र्दूल विशेषनस्तेन ऊर्ध्वं चमवलंबते। मासुरूपताभाजः अखिलाऊर्ध्वकामृदंग विशेषा यस्याः ययावा। हरीतक्या
कृतिस्तवकोयायवमध्यऊर्द्धकः। आलिंग्यश्चैव गोपुच्छाकारः। मृदंगा मुरजास्ते दो त्र्यंक्या लिंग्योर्ध्वकास्त्वयइत्य
मरः। तत्स्वरूपेतेति पाठो वा ग्रीवया रुचा अद्भुतेति एक परे नैमी विशेषणानि। अवदुर्घाटा ककाटिका। अर्धहारो
माणवक इत्यमरः। भवेन्माणवको वाले हारभेदे कुपुरुषे इत्यजपालः॥ ६१॥ कंठवर्णयति। कवित्वेति। विधा
ता अस्यास्त्वधिकं कंठे कवित्वं गानं प्रियवादः प्रियवचनं सत्यं चैतानि न्यधित विरचितवान्। कुतो ज्ञातमित्य
त आह सोयं विधाता कंठे रेखात्रयस्य न्यासस्य मिषाच्चतुर्णाममिषां कवित्वादीनां स्थापनं वासाय स्थित्यर्थं सी
माश्चतस्त्रो विवभाज विभक्तवान् रेखात्रयेणा चत्वारि स्थानानि निर्मवैति। कवित्वादिकलावती कंठे चतुष्टयमि
ति भावः। रेखात्रयं किंतु ग्रीवाकंबुग्रीवेति कथ्यते। ६२॥ श्लोकद्वयेन वाहू वर्णयति। वाहू इति। प्रियावाहुस्म
राणं जयतो। अनुमतमेतत्। यतः अस्मिन् भुजलक्षणे जयो नाम यत्तस्स न विस्मयः। अतिगौरत्वाद्दतिमृदुत्वा
च्च वाहुभ्यां मृणालं जितं किमाश्चर्यमित्यर्थः। अथवा द्वाभ्यामेकः सुखेन पराजीयते। अपव द्वंद्वे युद्धे जयो भव 20

द्वंद्वेर

त्यत्र नाश्चर्यं एकस्य जयो युद्धे भवत्येव। तत्तु तत्पुनरुद्धैरतिशयितं वित्रमाश्चर्यं॥ यत्तन्नग्नस्य जितस्यामुष्यां
तःकरणं निर्व्यपनं वैयर्थ्यरहितं आलोक्यते। पराजितस्यांतःकरणं सव्यपं भवति। अस्य तु नेत्याश्चर्यं। छिद्रा द्विधा कम
मृणालमध्ये छिद्राणि दृश्यंते भैमी भुजौ मृणालादपि गौरतरौ कोमलतरावितिभावः। द्वंद्वं कलह युग्मयोः
छिद्रं निर्व्यपनमित्यमरः। पद्मेनिर्गतं व्यपनान्निर्व्यपनमितिनिरादय इत्युत्ते रूपं॥ ६७॥ अजीयतेति॥ आ
वर्त्तनदक्षिणावर्त्तेन शुभंयुः शुभान्विता रमणीयानाभिर्यस्याः तया भैम्या कोमलाभ्यां दोर्भ्यां भुजाभ्यां कृत्वा मृ
णालमजीयत पराजितं किमु संभावनायां। अतएव निःस्वत्वं निर्व्यवस्थं स्पर्द्धारहितं निरूपायं सद्यवैतु नहि तं६
तं तं मृणालं घनपंकमृत्तु निविडकर्दममृत्तिकान्तःपांसुमर्त्त्यास्तु शरीरधारिणीषु त्र्यकीर्त्तिषु अयशःसु
निमग्नं किमु नाक्त अपितु ताभ्यां जितत्वाद्देववं विधमास्त। अयशस्तःश्यामत्वान्मृडुपंकत्वं। अतिकोमलं मृणा
लं तं तु रहितं भवति। अन्योपि केन विजितोऽनिरूपायःस्तन्नकीर्त्तिषु निमज्जतिच्छति। कोमलमपि मृणालं भैमी
भुजसदृशं नेति भावः। स्वत्वं नुसस्वनाग्रे पेस्वत्रं तंलु व्यवस्थयो नितिविश्वः। शुभंयुःमलत्वेहं शुभमोर्युस। ॥६८॥
श्लोकत्रयेण पाणिं वर्णयति। रज्यदिति। अशोप्रत्यग्रदृश्यास्मरस्य पंचशरीरज्यंतः स्वयमेव रक्ताभवंतो।

स-१
नै-टी-
२१

नखायस्य अंगुलीनां पंचकस्य मिषाद्व्याजात् त्रियायां भैम्याः करे अस्ति। किंभूतेः रक्तत्वाद्धिंगुलें हिंगु
लेन रक्तेः कृत्वा नूतनं जनितं यज्जूर्णं इषुधिस्तस्त इषुधेः किंभूता पंचशरी हेमाः सुवर्णमयाः एके श्रेष्ठाः पुंखामु
खानि यस्याः सा तथाविशुद्धानि रुंजूनि पद्मवर्णानि ये पर्याया यस्याः सा मदनस्य पुष्पायुधत्वादिषु
पि४ धिः पुष्पमया। तत्र पुष्पं सामान्याद्रक्तपद्ममेवाइषुधिश्च हिंगुलेन रंजिते। करस्य इषुधित्वं पंचांगुली
नां पंचवाणीत्वं। रक्तनखानां वसुवर्णपुंखत्वं। उभयोरपि विशुद्धपर्वत्वं। अत्युत्तमं वसुवर्णं रक्तं भ
वति। भैमीकरांगुलिदर्शनात् कामप्रादुर्भावो भवतीति। प्रतिपाणिवर्णाने पंचशरत्वं। हिंगुलेनेति रक्त
मित्यर्थः। पंचशरी समाहारः। हि गौड़ी पू॥ ७१॥ अस्या इति। यः पल्लवः अस्याः करस्य ईनस्य पाणिस्य
द्वितीयागर्धनं अभिलाषस्तेन रुद्धिराधिक्यं यस्य यद्वा स्पर्द्धनेन गर्धिः रुद्धिरभिलाषसमृद्धिर्यस्य भैमीपा
णिभ्यां तुल्योऽहमिति विलेपश्च एवंविधः सतु बालत्वं नवीनत्वं आपत्स्य खलु। यस्मान्नवीनस्य वतस्य र
क्तत्वात् पाणिसाम्यार्हत्वात् दर्पश्च बालत्वमहत्त्वं प्राप्तापाप्यापेक्षयाधिक्येन भैमीपाणिनामसहस्पर्द्ध
मानत्वात्। अपरस्यं पदोलवः पल्लवः वरणावयवः पाणिनासहयदास्य द्धेते तदासमर्खवएव॥ २१

पाणौ रूढत्वात्तस्य चातिनिकृष्टत्वादित्यर्थः। सपल्लवः भूयः पुनरपि अधरसाम्यगर्वेणाद्य तुल्याहमि
ति गर्वं कुर्वन् प्रकृष्टोऽपि बालः अतिनूतनः कथं वा नास्तु अपि तु तादृश एव भवतु अधरमखर्वः कथं नास्त्वा
यः पाणिसाम्यं न लेभे स पाणपेष्टयातिरस्कार्यः अधरस्य साम्यमिच्छन् प्रवालः प्रकृष्टोऽप्यखर्वः कथं नापि तु भा ३
अखर्वतर इत्यर्थः। नामेत्युपहासे। नवपल्लवादप्यतिरिक्तो भैमीकर इति भावः। अधरवर्णनं प्रासंगिकं।
मूर्खेऽर्भकेऽपि बालः स्यादित्यमरः॥ ७२॥ अस्येति। धाताऽस्यां हरिणेक्षणायां भैम्यां विषये हस्तलेखीकृ
तया लिखितया ऽभ्यस्तया तया सरोजसृष्ट्या कृत्वा इति आह किं पूर्वोक्तं अत्र इति किं। इति किंहेतोर्नेमि
अस्य भवत्करस्य वृत्त्यायोरे वसर्गाय निर्माणाय सरोजसृष्टिर्मम हस्तलेखोऽभ्यासो भूदिति। हस्तयोः
कमलादप्यतिरमणीयत्वं लक्षणं भक्तेरखजान्यकमलवत्त्वं च स्तवितं अन्योऽपि शिल्पी पूर्वं हस्तलेखं
करोति पश्चात्सुन्दरतरं वस्तु निर्माति। ७३॥ षड्भिः सालंकारो कुचौ वर्णयति। किमिति॥ अभितः पार्श्वद्व
ये दृश्या दर्शनयोग्या रमणीया मम नर्मदाया दर्शनमात्रेण सुखदाया अस्या भैम्याः सेयं वाहुलता
नृपा मृणाली किमिति संभावना। नर्मदायां नद्यास्तटद्वयेऽपि मृणाली दृश्या भवति। तद्वयमपि नर्मदा।

स॰ ७

नै॰टी॰ ततश्चैतदीयाबाहुवल्ल्यपि मृणालीति संभाव्यते। अस्याः कुचौ अन्तरीपद्वीपं किमुन्नतस्य तनुः उन्नम

२२ न्नतनुः। किं भूतायाः स्मरोष्मणा तारुण्यतेजसा हृत्वा शुष्यत्तरं अतितरां विनश्यद्वस्य बाल्यमेव वारि

त्यक्तस्य जलयस्य। बाल्यनाशात्तारुण्ये हमा द्वीपतुल्यावत्तुल्यौ कुचौ अस्या इति भावः। जलशा

षान्नर्मदायां द्वीपयोरुन्मज्जनं युक्तं। बाहुलतेति शिष्टप्रयोगः। आपः स्त्रीभूम्नि वा वारीत्यमरः। अन्तरीप

द्वोतरुपसर्गेभ्योऽप ईत्। ऊ कुरूदितिसमासांतः॥ १४॥ तालमिति। तालफले द्विविधं पतितमपतितं च॥

तालं कर्तृ एतौ कुशांग्या भैम्याः कुचौ अनुकर्तुं प्रभु समर्थं स्यात्। यतः पतितम्यौ भैमे कुचावनुकर्तुं न

तावत्प्रभु समर्थं। यतः उच्छूनेन परस्परसंश्लेषाद्भ्रमेन न मुस्थैः निरंतरत्वेन सुंदरावित्यर्थः। तस्यप

तितत्वान्नयोरुन्नतत्वात्साम्यं न युज्यत इत्यर्थः। अन्यदपि पातित्यदोषयुक्तोऽन्यं सुहृत्तिं न समीकर्तुं

न शक्तो स्येवेत्यर्थः। द्वितीयस्यापतितस्याप्यसामर्थ्यमाह। परमिति प्रायेण माहात्म्यं मपत्व परमन्य

मुच्चैस्तालवृन्तं आश्रित्य तुंगमपि कुचौ समीकर्तुमसमर्थो यतः कुचौ स्वत एव परानपेक्षमेव तुंगौ

उच्चतरौ। स्वतस्तुंगस्य पराश्रयेणैव तुंगस्य कुतः साम्यं। तालफलादप्यपतिताद्वृत्तोउच्चतरौ रौ च भै २२

भीकुचावितिभावः ।७०। पाल्यत इति । एतस्या भैम्याः कुचस्पर्द्धितया स्तनस्पर्द्धया ख्यातस्य प्रसिद्ध घट स्य स्य न्यायशा
स्त्रादिषु यत्कृतकं तदनित्यं यथा घट इति यन्नित्यं न तदकृतकमपि न यथा घट इत्यन्वयव्यतिरेकाभ्यां निदर्शन
त्वं दृष्टांतत्वमजनिजातं । प्रसिद्धस्य हि दृष्टांतत्वं । अन्योप्यप्रसिद्धः प्रसिद्धस्पर्द्धया ख्यातो भवतिमतिः । कारिका
री अलिंजरादिकारी च तस्मात् शिल्पात् भैमीकुचस्पर्द्धिघटनिर्माणादेव प्रसिद्धं नाम यस्यैवंविधः सन् कुंभका
रो जनि जातः । मणिकादिकारित्वात् कुंभकारस्य कुंभकारत्वप्रसिद्धिर्न । किंतु भैमीस्तनस्पर्द्धया ख्यातस्य कुं
भस्य निर्माणात्कुंभकारत्वप्रसिद्धिः । नान्यकिंचित्कारत्वं । वरं विरोधोपि समं महात्मभिरिति भारविवचनात् ।
कुंभपरिमाणावेतत्कुचाविति भावः । अलिंजरः स्यान्मणिक इत्यमरः ।७१। गुच्छेति । माणिक्यमयहारस्य
रोहितश्रीः लोहिताकांतिः विदर्भसुभ्रूपयोधरे भैमीकुचे रोहति प्रादुर्भवति । किंभूते गुच्छो हारविशेषस्त्राल
यः आश्रयो येषां तानि स्वच्छतमानि निर्मलतराणि उदविंदुवृंदवत् जलविंदुसमूहवत् आभायते या तानि
मुक्ताफलानि सितः फेनिलः फेनयुक्त इवाह्वलत्तरंगः कामध्योयस्याः मुक्ताहारमाणिक्यहाराभ्यां भैमीकुचौ शो
भेते इति भावः । अथ च पयोधरे मेघे रोहितश्रीः ऋजुशक्रधनुः शोभा प्रादुर्भवतीति उक्तिः । हारभेदा यष्टिभेदा

स-१
नैषधी-
२३

गुच्छगुच्छार्द्धगोस्तना॥ इंद्रायुधं शक्रधनुस्तदेव स्त्रजुरोहितं॥ रोहितो लोहितो रक्तः इत्यमरः॥ फेनिलः मत्व
र्थ फेनादिलश्चेति इलच्॥११॥ निःशंकेति॥ पदेतन्मुखं वश्यस्या भैम्या आयं इंदुर्विंब एव उदरीतः॥ किंभूतः निःशं
कं यथा तथा बलात्कारेण संकोचिता निनिमीलिता निश्रयपवर्जितानि कमलानि येना मिदं मुखं न किंतु वं
द्रायमित्यर्थः॥ वंद्रेण हि कमलानि संकोच्यंते॥ मुखेनैक घास्मं कुचितकमलएवे तेन तु कुचावित्यर्थः॥ तथा
प्युदितेपि चंद्रे सत्तनल स्तनांको कयुग्मं चक्रवाक युग्मं कर्तृ स्तोकमपि अल्पमपि विप्रयोगं वियोगं नांवति
न प्राप्नोति मिलितमेव यतिष्ठतीति चित्रं आश्चर्यं। चक्रवाकयुग्मं चंद्रोदये वियोगं प्राप्नोति कुचलक्षणं ने
त्याश्चर्यं। चक्रवाक कमलकलिकाकाराव तिसंश्लिष्टेनैव तत्कुचावितिभावः॥१८॥ आभ्यामिति। आभ्यां प्रत्यक्षद
श्याभ्यां कुचाभ्यां इभकुंभयोः श्रीसोभा संपद्बलात् आदीयते गृह्यते इहकुंभश्रियोत्र दर्शनादित्यर्थः॥ ताभ्यामि
भकुंभाभ्यामनयोः कुचयोः त्रासेनादीयते। कुतो ज्ञातमित्यत आह। यद्यत्तस्माद् ताविभकुंभौ भयेनार्थात्स्तन
सकाशादेव भीत्या गोपायितमौक्तिकौ। इमौ कुचौ तु प्रकटव्यक्तमुक्ता भरणौ प्रकटमुक्तालंकरणौ मुक्ताय
हाराभियभकुंभाभ्यां स्वमुक्ता गोपिता॥ इभकुंभाभ्यामप्यधिकं भैमीकुचौ रमणीयाविति भावः। अन्यापि भीता २३

स्वरत्नानि गोपायति निर्भयश्च प्रकटयति॥७९॥ करेति॥ कराग्रे जाग्रत् विद्यमानः शतकोटिर्वज्रो यस्य स इंद्रः ययोः
कुचयोरर्थी याचकः कुचमर्दनाभिलाषी॥ उन्मदिष्णु लक्षणया पक्वं सद्यः श्रीफलं बिल्वफलं कर्तवेघस्लीदृ
शौ कुचौ तुलयेत्स समीकुर्यात्तस्याभिलाषिय दिभ्वेव तदा तर्हिं तद्विल्वफलं अधुनावटीमपि लक्षणयास्तनला
वण्यलेशमपि लब्धुं न जातं नोत्पन्नं। रंभाघस्रस्सो विहाय इंद्रोप्यतयोरभिलाषी ताभ्यां अतिसुंदराभ्यां कुचाभ्यां
पक्वमपि बिल्वफलं तुल्यं कर्तुं नैवेदित्यर्थः। यथा उत्तमस्यार्द्धयानी वस्तेनावज्ञा तत्वात्कपर्दकमल्पमपि न ल
भ्यते तथाति तुच्छं जातमित्यर्थः। वज्र संख्याकमपि द्वाभ्यां समं नाभूदिति सर्वपदेन सूचितं॥ अथ वकराग्रेजाग्रतीः
शतंकोट्या इच्छसंख्या यस्य सो पियर्थोरर्थी ग्रहणाभिलाषी ताविमौ कुचौ सर्वलक्ष्मीफलं तुलाये तत्तदा उन्मदि
ष्णुत्वाद्वटीवराटिकामपि लब्धुं न जातं न योग्यमित्यर्थः। वटः कपर्दन्यग्रोधाइति विश्वः। स्त्रीस्यात्काचिन्मृणाल्या
दिर्विवक्षापचये यदीत्यमरसिंहवचनाद्ल्पावटोवटी॥ उन्मदिष्णिन्यत्राले हेश्रीतिर् ष्णुच्॥ ८०॥ स्तनेति। चंद नी
निनपंकिले अंर्द्रे चंदनयुक्ते स्याः स्तनावटे गंभीरे स्तनमध्ये जातस्य निष्यन्नस्य यावघुवमानसानां सर्वतरूण
तः करणानां स्खलनस्य पतनस्य हारावल्या रत्नानि तेषां मयूखधाराः किरणपरंपराः आकारः स्वरूपं यासां

तारखाः स्फुरंतिप्रतिभासंते। किरणपरंपरेयंनभवतिकिंतुएताः पतनेरखा एवेति। एवंभूतंस्तनमध्यंदृष्ट्वास्म
र्वेपिमुह्यंतीतितत्रस्खलनस्योक्तत्वात्तत्राल्पावकाशा इतिभावः। पंकिलेगर्त्तेलोकस्यपतनंतद्रेखाभ्योत्पद्यंते
अवटास्यात्खिलेगर्त्तेकूपेंकुहककत्रीविनीतिविश्वः। पंकिलः पिच्छादिः। यावंतोयुवानस्तावतामितियावद्युवं
साकल्येव्ययीभावः॥८१॥ वलीसहितमुदरंवर्णयति। त्रीणेनेति। मध्येपिअवलग्नेसतताविद्यमानेनत्रीणेन
कृशतरेणउदरेणयत्रवलिभ्यः त्रिवलिभ्यःसकाशादाक्रमेणंअभिनवंप्राप्यतेतत्सर्वांगशुद्धोसर्वांगानां
शुद्धिर्यस्याः एवंभूतायामिहास्यांभीमभुविभैम्यांचित्रंआश्चर्यंरूपंअनंगराज्यस्यकामराज्यस्यविजृंभितंवि
लसितंअद्भुततारुण्यवशात्सूक्ष्माणांवलीनामपतितत्वात्ताभिरतिकृशमुदरंनाक्रांतमित्यर्थः। अन्येनापि
त्रीणेनदुर्बलेनोन्नयाःसीमायांविद्यमानेनापिस्वाम्यमात्यादीनांसप्तांगानांशुद्धोसत्यामपिवलिष्ठेभ्योभयान
कायांभ्रमेणपराभवोनप्राप्यतेतत्दुर्लभस्यसप्तांगरहितस्यविलसितमाश्चर्यंरूपं। वलिनोसर्वांगशुद्धेर्विद्य
मानत्वात्त्वस्यचसर्वांगराहित्यात्सीम्निवर्त्तमानत्वाच्चबलवत्पराभवकारणस्यापितत्पराभवोनप्राप्तइत्याश्चर्य
मित्यर्थः। तथाभीमस्यभुविराज्येणअनंगस्यराज्यकथमन्यभूमावन्यराज्यभावासंभवात्॥ अथवभीमस्यमहादे 

तस्यभुविकामस्यराज्यमित्यप्याश्चर्यापरैश्वर्येहीतुमशक्यत्वादित्ति विषमायांभमोपराभवान प्राप्यतेत्रत्र वि
त्रमपितुनेतिकाकुक्ती॥५२॥मध्यंवर्णयतिवधाः इदमीयंएतदीयंमध्यंतन्नकृत्पातिकृशंकृत्वामध्यसंबे
धिनंकमनीयमंशंभागंयद्दियस्यातिसुंदरस्यमध्यांशस्यसंग्रहंहकृत्वातेनैवांशेनयौवनेकुचौकृतवानित्यर्थः॥
मध्योतिकृशस्तनौवातिसुंदराविति भावः॥५३॥रोमावलींवर्णयति।गौरीति।विधाताअस्यामध्येरोमावलील
क्षणंमेचकस्तंनीलस्तंभंइतीवविदधेकृतवानित्राइति किं।सुभगास्तेभाग्यवतीयमपिपत्याप्रियेणकृत्वा
कदाचित्अर्द्धतनुसमस्यांशरीरार्द्धस्फुरणंकर्त्तांकरिष्यति।कथंगौरिवपार्वतीईश्वरेण।अर्द्धतनुसमस्यांय
थाकृतवतीतथेयमपि।इयंरोमावलीनकिंतुअर्द्धशरीरघटनार्थंनीलंस्तंभंनिहितंइत्यर्थः।कर्त्तेति लु
ट॥५४॥पुनरपिसनाभिंरोमालींवर्णयति।रोमेति।मदृष्टिस्त्वम्मामम दर्शनवांछा रोमावलीलक्षणंम
तुंतुरोजलक्षणो कुंभेनागभीरेनाभिलक्षणेकूपेवासाघ प्राप्यतर्हिविरमेच्छाम्पतत्।यदिएषारोमावल्या
दीनांसिवखनवस्त्रेणोपांगुप्तिर्दर्शनेनस्यात्।बतखेदे।एवंतुनज्ञातमितिखेदः।अवच्छितानामेषांसुख
नदृष्टुशक्यत्वाद्दर्शनवांछाशाम्यत्वस्त्रावृतत्वात्तुनेत्यर्थः।अथवाऽनावृतदर्शनाद्विरागःआवृतदर्शना

॥ न्वनुरागवशात्पुनः२ दृष्टिस्तैववर्द्धतइत्यर्थः॥ रोमावल्योर्वस्त्रेणगोपनादेवितर्कितं॥ अथवेदार
कं कुंभोगंभीरं कूपं चप्राप्यतृष्णा पिपासा तदाशाम्यतिपद्येते ग्रामसिंवयेनलक्षणयारवड्गधारिपुरुषस
म्हेनरक्षणंनस्यात्॥ राजैकभोग्यः कूपः खड्गपाणिभीरक्ष्यतेः तोजलहरणासामर्थ्यीसद्भावेपिपिपासान
शाम्यतीति॥ अतिगंभीरनाभिरियमितिभावः॥ त.श्लेस्टहा पिपासेदकृत्यमरः॥ विरमेतरक्षा दूःपरिस्फारमद्र
तिपरम्भेपरा॥ ७०॥ उन्मूलितेति संयं नैमीमत्तस्यो द्विरदस्यावैधेग लन्महूजलस्यमरनरूपस्य द्विपस्य
वास्तव्यवसतिगृहमस्ति॥ किंभूताउन्मूलितमुत्पाटितं यदालानं बंधनस्तंभः तत्संवधियद्विलेगर्त्तःतद
नुतन्तुल्या अतिनिम्ना नाभिर्यस्याः सा तथा छिन्नं त्रुटितं स्खलत्पतितं शृंखलं तत्तुल्या रोमराजिर्यस्याः
तथाभूतस्याप्ययगजस्यशयनार्थंप्रवतनिर्मितवरंडवतउच्चकुचाउन्नतकुचा॥ इमामेवावलंब्यका
मोऽतिमत्तोजातइतिभावः॥ रोमावल्याः छिन्नत्वं वलीमध्यगतत्वात्॥ मुखैवाच मत्तस्यवसतिगृहमप्युक्तत्वाद्द
शोभवतिशृंखलेत्विषिसृत्यमरः॥ ७८॥ रोमेति॥ सरतिजानिवीरः रतिजाया सस्मरतिजानिः स्मरःसवासौ
वीरः स्मरस्तस्यैरीतदीयैः क्रमेणरोमावलिश्च मुखैवोचकुसुमालिवतइषोः शतमौवीचापेषुभिः कृत्वाजेत्रा २५

जेता लोकत्रयमपि जयतीत्यर्थः। एतच्चित्रं। किं नु तैस्तै रोमावलिभ्रूकुसुमैः मध्यललाटमूर्द्धव्याप्तैः परस्परासं
बद्धैः स्थास्नुभिरपि स्थितैरपि रोमावलीरूपाज्यां मध्ये भ्रूरूपं वापं ललाटमूर्द्धि कुसुमरूपान्वाणांश्च विद्धं
ते। एवं पृथक् स्थितैरपि लोकत्रयजयादाश्चर्यं। अन्यो हि धानुष्को मौर्वी धनुर्बाणैः संमिलितैरेव जयति
न तु पृथक् स्थितैर्नैकैकेन। अत्र तु विपरीतदर्शनादाश्चर्यं॥ प्रत्येकं भैमीरोमावलीभ्रूकुसुमदर्शनात्का
मप्रादुर्भावो भवतीति भावः॥ मल्लीति प्राण्यंगत्वादेकवद्भावः। स्थास्नुभिः ग्लाजिस्थश्च क्स्नुः। रतिजानिः जाय
यानिङ्॥८७॥ पुष्पाणि बाणाः कचमंडनानि भ्रुवौ धनुर्मौलिमलंकरिष्णु रोमावलिर्मध्यविभूषणं ज्या तथा
पि जेता रतिजानिरेतैस्त्रिभिस्त्रिलोकीं तरसापि व्याख्यातप्रायं॥८८॥ एकस्य पल्लीं वर्णयति। अस्या इति। अस्या
ग्रंथ्या निबद्धाः केशाः केशपाशस्तत्र मल्लीकदंबानि विकसितमल्लीपुष्पसमूहास्तेषां प्रतिबिंबस्य वेषा
त्व्याजात् एकस्य पल्लीलक्षणायां हाटकपट्टिकायां सुवर्णघटितपट्टिकायां इयं दृश्यमाना रजताक्ष
रारूप्यमय्यास्करा स्मरप्रशस्तिः कामयशःप्रशस्तिः। उत्तमस्य प्रशस्तिः सुवर्णपट्टिकायां रजताक्षरैर्लिख्य
ते। भैमीपृष्ठं सुवर्णपट्टिकारूपं तत्र केशग्रंथिषु निबद्धमल्लीपुष्पाणां प्रतिबिंबितत्वाद्रजताक्षरत्वं। वे

स॰ १

नै॰ स॰ टी॰ णीनिवद्धकेशपुष्पाणां पृष्ठप्रतिविंवासंभवाद्दृष्टिनिवद्धेत्युक्तं। सुवर्णपट्टिकातुल्या मदनजनिका वैमै

मीपृष्ठस्थलीतिभावः॥ खलु निश्चये॥ २८॥ श्लोकद्वयेन नितंवं वर्णयति। वक्रेणेति॥ मत्स्यकेतुः कामः पितुः श्री

२६ कृष्णस्य सुदर्शनेन चक्रेण युधि विश्वं जितं वीक्ष्य वस्त्राच्छादितवान् दुर्लभदर्शनेनामुना नितंवद्वयेन नितंव

रूपेण चक्रेणाहं च जगज्जिगीषति किं। किमिवार्थः। सुलभदर्शनेनापि तच्चक्रेण जगज्जितं मया तु दुर्लभदर्श

नेन सुदर्शनादधिकेन चक्रेण जेतव्यं। पुत्रेण पितुरपेक्षयाधिकेन भवितव्यमिति मनीषया कामेन कृतमि

त्यर्थः। कामजनको भैमीनितंव इतिभावः। जिगीषतिः सन्लिटोर्जेरिति कुत्वं॥ २९॥ वाला भैमी तारुण्यमूर्त्तिः

तारुण्यस्वरूपस्य तारुण्यकुलालस्य कुचकुंभकर्तुः। कुचकुंभकारस्य एतत्सहकारिचक्रं सहकारिकार

णं दंडं विभर्त्ति अहं शंके। एतत्किं। रोमावल्येव चक्रभ्रामकं दंडं। नितंवचक्रं पंचगुणवशीलादिलक्षणमेव गु कं

णो दोरकं वलाच्चरणरूपजलं च। कुंभकारस्यापि दंडचक्रजलदोरकलक्षणं सहकारिकारणं भवति। तारु

ण्यसत्यत्वानि प्रादुर्भूतानीति भावः॥ ३०॥ वरांगं वर्णयति। अंगेनेति। अस्याः केनापि अतिसौंदर्यादनिर्वच

नीयेनापूर्वशाम्यत्वात् सकटं व कुमयोग्येन अंगेनावयवेन नवलपत्रस्याश्वच्छस्य पत्रं विशेषराजं तुं गवेषणी २६

ते

तत्किमित्युच्यते। उक्तौ। ज्ञातमित्यत आह। न वेदेवं तर्हि इत्तरच्छदेभ्यः अन्यत्र तद्दलेभ्यः सकाशाद्विशेषा
दाधिक्यात्तस्य बलदलस्य कंपः। उक्तः। कस्मात्तु भये नाक्तं भवेत्तु। अन्यरक्तदलापेक्षया ऽस्य च्छददले भय
कंपो दृश्यते। तद्देनेन जे तुंगवेष्यते। आ कारेणास्य च्छददलतुल्यमस्यावरोगमित्यर्थः॥ ९१॥ पंचभिः श्लोकै र
त्नवर्णयति भ्रूरिति। अस्या भैम्याः भ्रू श्चित्रा ऽश्वर्येत्तरपालेखाविन्यासाय स्यात्। सात्र एव चित्रलेखाप्सरो
विशेषः। तथा ऽस्या नासा तिलात्तिलकुसुमाद्दृष्टपुत्तमा ऽतिरम्या ऽपवना सेवति लोत्तमा ऽप्सरोविशेषः।
तथा ऽस्या ऊरुः स्टष्टिश्च रंभा स्वयं कदली अथ च कुंजे स्वष्टिः रंभाप्सरो विशेषः। यद्यस्मात् ततस्तस्मादि
यमेकैव दृष्णासत्ती अनेकाप्सरसां प्रदत्ताणां जनितानितौ कौतुकानिश्चरयति जनयति। ताभ्योऽप्यस्या अ
तिसौंदर्यं दृष्टः कौतुहलं जनयतीत्यर्थः। एतद्रूरकदलीतुल्या वितिभावः। तिलादुत्तमेति पंचमी योग वि
भागात्समासः॥ ९२॥ रंभेति। रंभापि कदल्यपि आत्मनः प्रकांडे स्वस्पक्तं भं स्वेना त्मनानन्वयेनैव विद्रूयति स्वी
यत्वेन न जानाति किं। एतद्दुत्तरवन विद्रूयति किं। एतदीयत्वेन नं जाति किं। लोको न जानाति रंत्रापि न जा
नातीत्यपि शब्दार्थः। स्वं त्तं भैम्प्रा रत्वेन भैम्प्रारत्वस्वक्तं भलेनात्तासीत्किमित्युत्प्रेक्षा। उक्तो ज्ञातमित्यत्र आ

तं

स॰८

नै॰पू॰टी॰ २८ हृयनकारणेनानयोर्भैम्यूर्वोर्भैमत्तभैम्याहृएताविति तुच्छासारभास्वस्यात्मनएवापरिस्वैनैवपत्राणि
पत्रालंबनानिदद्ती सती जागर्त्ति। अन्योपि वा रिंप्रतिवादिनिपत्रालंबनं कुरुते। इयं स्वपरविवेकाभा
वात्परस्मिन्कर्त्तव्यमात्मन्येवकारोतीत्यर्थः। कदलीस्तंभोपरिदलानि भवंति कदलीगर्भस्तंभतुल्यावेतद्दृत्त
पो ४ इतिभावः विक्रुर्वतं करोतिति तत्करोतीति णिविमतुलोपः॥ ६३॥ विधायेति। कदलीइदमरूरुवास्तस्याऊरू
वद्वारुस्तत्तुल्यकीर्तिस्तदास्यात्तदाभवेत्यदिमर्द्दनमधश्चरं अवागंतं विधाय कृत्वा तयोभिः वोढ्
यणादिभिः कृत्वास्त्वस्वीयं असारभावं निःसारत्वं वेस्तुवेत्स्यजेत्तरत्तथावलीयः सार्वकालिकंजाड्यं शीतलत्वं
दन७ विनावैस्यानुयात्तदैवतदूरुतुल्याभवेत्। कदलीभैम्यूरुतुल्यकांतिर्यदिनेवक्ष्यति तदाभवेत्। एवंयदि
कदलीकुर्यात्ततदिदमस्रूरुवारूवारूःस्यान्नान्यथेत्यर्थः। ऊर्वोर्द्वर्धदिशस्य स्थूललाद्धोदेशस्यवर्त्तुलत्व
त्वात्ससारत्वाच्च कदल्याश्चैतस्माद्वैपरीत्यादिदमस्रूरुवारुत्वं न युज्यते। तथैतद्ग्वयोः शीतकालेसोष्म
त्वादुष्णकालेचशीतलत्वात्कदल्याश्चसर्वदाशीतलत्वादेतद्दृश्यारुत्वं न युज्यते तस्मात्तपसाकदल्या
एतदूरुवारुत्वंसाध्यं। अनुपमावेतद्रूरूइतिभावः। अन्योपिमर्द्दनमधोविधायतपसास्वीयमसार २८

त्वं मन्यविष्णुमूर्त्तिं वत्स्यति सको न्नमेनसमानो भवति। सुषीमः शिशिरो जड इत्यमरः। ५४ ऊर्वीति। तच्छ्याः ऊरुषकां
ड्लीकरणाभ्यासेन क्रियालज्जया कृत्वा स्वीयं मुखमस्तं पुष्करेण गोपायति न दर्शयति तत्र युक्तं॥ ५५॥ अ
स्यामिति। अहं अस्यां व्यासादिमुनीनामपि मोहं भ्रांतिमहेह तर्कयामि मुनयोप्येतामाश्रित्य पतितुं ईति। अप
वजितेंद्रियाणामप्यस्यां विषये सो हे मदन विकारं तर्कयामि इति प्येतयामोहिता इत्यर्थः। यस्मान्महान्
अतितापसः भृगुः कुचशैलशीली कुचपर्वतसेवी। मुनीनां पर्वताश्रयत्वात्पर्वतवुद्ध्यास्तनावाश्रयति
अपचकामपीडितश्चारुस्तुवावेतत्कुचौ मर्दयितुमिच्छति। अथ च भृगुस्तटः पर्वताश्रये एव वर्त्तते। कुच
योः पार्श्वभागस्तट तुल्य इत्यर्थः। शीलत्यमेव शैलं कुचयोः शैलं स्वभावं शीलयति अभ्यस्यतीति पर्व्वघापि
कुचस्वभावो नायातीत्यर्थः। मुखं नारदं आह्लादयतीति नारदाह्लादि न नारदाह्लादि अनारदाह्ला
दि एवं विधं न भवति किंतु नारदाह्लाद्येव। गानकलाभ्यासार्थं। नारदो मुखसेवां करोतीत्यर्थः। मदन
पीडितत्वाड्डुमुखं तु वनाभिलीषितं नारदमानंदयतीत्यर्थः मुखं नानाविधैर्द्वात्रिंशत्संख्याकैरदैर्दंतै
रानंदयत्यतिसुंदरमित्यर्थः। महाभारतस्य सर्गनिर्माता योगपः समर्थः व्यासः श्रितावृत्तये नैवं विधः केद

स.८

नै.सु.टी. लीलं भ्रष्टा यावुरुस्था एतद्दूरूत्रा श्रित्य तिष्ठति। अथ च कामपीडितं चोरू तद्दूरूसमालिंग्य वर्त्तते इत्यर्थः महती
२७ भा दीप्तिर्यस्य रतं सुरतं तस्य सर्गो निर्माणं तत्र योग्यः स्तनौ तु कर्मधारयः इति वा एवं विधो व्यासो विस्तारः श्रितावू
रू येन। अति विशाला वूरू इति भावः। मृदुः श्लक्ष्णे पश्चात्ते च जमदग्नेः पिनाकिनो व्यासो मुनोस्याद्विस्तारे इति
विश्वः॥४६॥ जंघ वर्णयति। क्रमेति। अस्या अधिजंघे जंघयो। विद्यमाना क्रमोन्नता पीवरता वेशाह क्रम निर्मता
पीनता उक्तस्याधिरूढ चद्धि प्रकारं विदुः। श्रीकिं जानाति किं। इक्षो यथा मूलभागे स्थूलो ऽग्रभागे च स्थूलस्त
थैयं जंघयोः क्रमेणोन्नता पीनता। ऊर्द्धभागे इक्षो यथा भारवान् भवति तथैयं पीनतापीत्यर्थः। अथ च रूस्ता
धिरूढाख्यमालिंगनं विशेषं जानाति किं। तथा भ्रमीभंगीभिर्भ्रमण कारवेष्टन विच्छित्तिभिः कृत्वा आरू
तमंगं येनेवं विधमस्या वासो दुकूलमपि लत्ता यावेष्टितके प्रवीणं कुशलं। यथा लता भ्रमी भंगीभिर्वृक्षं
वेष्टयति तथैव दुकूलमप्यंगं वेष्टयतीति भावः। वाकुंभ्यां कंठमालिंग्य कामिनी कांत उच्छ्रिते। अंकमारोह
तितस्पष्ट त्वा रूढः स उच्यते। उपविष्टं प्रियं कांता सुत्ता वेष्टयते यदि। तद्वृत्ता वेष्टितं ज्ञेयं कामानुभव वेदिभिः राम
अधिजंघे विभक्त्यार्थे व्ययीभावः॥४७॥ गुल्फौ वर्णयति। अरूंधतीति। अरूंधती वसिष्ठपत्नी काम पुरंध्रिर २७

तिः लक्ष्मीः जंभद्विषद्दाराः इंद्राणी नवसंख्याकाश्चेविकाश्च ब्राह्म्याद्याः सप्त गौरी सरस्वतीति ह्येतासां त्र
योदशानां पूरणी चतुर्दशी येयं यस्मात्तेन तस्मादिहास्यां अदृश्यस्य वस्तुनः सिद्धिरदृश्यता सा उच्यते तेन यु
क्तेव गुल्फक्षयेनाशाप्राप्ता। अत्र धन्यादिवदियमति सुंदरी पतिव्रता च तस्मादस्या निमग्नगुल्फत्वं नाम सामु
द्रिकं लक्षणं युक्तमेवेति भावः। यस्मादस्या अदृश्यसिद्धिर्लब्धा तस्मादियमरुंधत्यादीनां चतुर्दशी समुचि
तेति वा संबंधः। आगमे चतुर्दश्या अदृश्यत्वसिद्धिर्भवतीत्युक्तमित्यर्थः। चतुर्दशानां पूरणी पूरणार्थे इसे
रव्यादित्वात्तमट्। टित्वान्ङीप्॥ ८०॥ पद्भ्यां श्लोकेः पादौ वर्णयति। अस्या इति। चारुतया सौंदर्येणाढ्चाम
होत्ता तुत्तमोऽस्याः पदे। अपस्य यसो त्वं अल्पत्वमेतस्य सुंदरस्य दापेक्ष्यास्वस्य पदस्य लवता ह्कसोद
र्या भावादित्यर्थः। तस्मात्तलव भाव भाजः प्रदेशा भाले शशरूपत्वं भजतः। महीरुहाणां प्रवालस्य बालकिस
लयस्य पल्लव इति शब्दस्तस्य लब्धिः लाभः जाता इति वयं जानीमहे। पदो लवं भेभ्या श्चरणस्ते वं धील
वालेशो यस्य पदे लवस्य रूपो वा यमिति पल्लवशब्दः। प्रवालशब्दस्य पल्लवशब्दप्राप्तिरनेन प्रकारेण जाते
त्यर्थः। प्रवलांदस्य प्रविकं रमणीयो च वर्णाविति भावः। लब्धिरिति। क्तिन्नावादिभ्य इति क्तिन्॥ ८१॥ जगद्धिता॥

स॰८

नै॰सू॰टी॰ २९

॰ एतया सुदृश्य दृशा प्राप्तसौन्दर्यगर्वीत्र जगद्वधूमूर्द्धसु लोकत्रयसुन्दरीशिरःसु पदारविन्दं यद्यस्मादधायि
दन्तौ। तत्पदारविन्दद्वयं तेषु मूर्द्धसु संइंयम्रिंइरं तस्य परागस्तेषां रागैर्लौहित्यैः कृत्वा प्रवालात्पद्मवादि
द्रुमाद्या प्रबलमधिकमरुणामारक्तं जातं ध्रुवमुत्प्रेक्षे। नेमीश्वरणावत्यरुणाविति भावः॥१०॥ रूपेति॥
श्रीलक्ष्मीः शोभाविधेर्ब्रह्मणः सकाशाद्भूम्या ॰ परं स्यानं स्वरूपत्वेनाधिकां वा चरणी तस्मया वतेस्माय
ता सर्वैः स्त्रीगुणैः कृत्वा श्रियं जयेत्याः। अतएव किं भूता रूपाक्रोधेनारुणा। सत्र ह्या प्रवं निश्चितं तो श्रि
यमछलयत प्रतारितवञ्चायतो यस्मात्तस्मादरुणाऽतिरक्तासा श्रीः एतत्पदभाग्नेमीश्वरणासेविनी विभाति
शोभते यद्वा भृशारूणेति पदविशेषणत्वेनैकं पदं पदपरशाद्बलेन नेमीश्वरणं दत्तवान्स्वरूपादि। शत्रु
णा जिता न्यापि देश्वतां प्रसन्नीकृत्य तत्पदं याचते। नेमीश्वरणशोभा लोकोत्तरेति भावः॥११॥ यानेनेति॥
तच्चापाः पादा हुराजौ श्रेष्ठकमलतुल्यौ चरणौ कतरस्य राज्ञः कस्य नृपस्य प्रणायकलहे नमस्कारार्पणेत
न नम्रेणा मूर्ध्ना प्रयोऽस्पनस्वमातान्मानं स्मृषयितुं आत्मसेवाकारयितुं इच्छु अभिलाषुकौ इति न जाने। किं राम॰
भूतौ यानेन गमनेन कृत्वा जितो दंतिनाथो हस्तिश्रेष्ठो याभ्यां तौ। तथा परिस्फुरद्बहुरमणीयः पार्ष्णिश्चरणापश्चा २९

श्री२

ह्नागोययोक्तो॥ एतादृशग्रहस्तन्नपः केनराज्ञा कृतमितिनजानइत्यर्थः।गजगमनेयमितिभावः।भैमीवरणे वब
राजानौयानेनविजययात्रयाजितोगजपतिर्गौडेश्वरोयाभ्यांतौ तथापरिभ्रुद्धः पार्ष्णिग्राहोययोरेवंभूतौ सं
तौ कस्यराज्ञः भीतत्वान्नमस्कारार्थंनम्रेणशिरसास्वसेवां कारयितुमिच्छ नजाने।अन्योप्येवंविधोराजाग्र
हमंत्रत्वास्वसेवांकेनकारयिष्यतीतिनज्ञायतेतेनचप्रसिद्धेनोर्जितेनमम स्त्री।नजानइतिना।अन्यत्सर्वं
वत्तद्दतिथा।३॥ करोति।स्वस्यात्मनः अखिलंसमग्रंयत्तुल्यंपाशनीलोत्पलादितस्पेजेदुर्नेत्रस्यकर्णाद
कर्णः अक्षिनेत्रंदंतश्छदश्च ओष्ठः वाहुः पाणिः पादश्चरणः एतेषांसमाहारः तदादिर्यस्यआदिशब्दात्स्वा श्वा
देशप्रत्येकमवयवस्यद्वयतामिमानात्मस्तदृशं सुंदरमन्यन्नास्तीति अहमेवैकंसुंदरः रमितित्रदेत
गर्वाद्दुद्वेगभाक्क्रोधयुक्तः वेधाइहैवास्यां भैम्यामेवद्वितीयंद्वयोः पूरणं कर्णं द्विकृतवान्। हि कर्णाद
यः एवंगर्वयेत्कुरूपतर्हिभवद्गर्वशांत्यर्थंभवत्सदृशमन्यमस्यामेव करिष्यामीति द्वितीयंकर्णं द्विकृत
वान्इत्यर्थः अतिक्रुद्धो हितद्दर्पशांतयेतत्रैवप्रतिद्वंद्विनंरचयति।भैमीकर्णौ नेमीकर्ण इव नान्येन तुल्यः
एवंनेत्रादावपिज्ञातव्यं।कर्णौ इत्यादौ आप्यंगत्वादेकवद्भावः। स्वाखिलेति भाषितपुस्के॥१०३॥तुघा

स॰ ६

नै॰टी॰ ३० रत्ति॥ विधातुः इह एषु पं वस्तु आस्यं अंह्री कैरोव एतेषु भैमी वदनवरणा द्वंद्व पाणि द्वंद्वेषु विषये अभिख्या
भिक्षाशोभा याच्ञा माधुकरी सदृशायति भिक्षातुल्या भवतीति शेषः॥ किंभूतस्य विधातुः तुषारेण हिमेन
निःशेषितं आत्यंतिकं विनाशितं अंबुजसर्गं कमलसृष्टिं अधुनेदानीं पुनर्विधातुकामस्य निर्मातुकामस्य
भि ४ भिक्षा हि गृहगृह पंचकए व भवति। मधुकरोप्यनेकानि पुष्पाणि मधुयाचिवास्वादरभरणं करोति। तत्संबं
म ५ धित्वान्माधुकरी। कैलोन्यतद्दनादितुल्या निनेति भावः॥ आस्यादीनां प्रत्येकं द्वंद्वेपि पंचस्वित्वेन नसं
ख्यापरिगणनादधिकरणो तावत्त्वेवैत्पकवद्भावाभावः॥१०४॥ अंगुलीर्वर्णयति॥ स्मरार्त्तान्नृपाः इमेप
दाब्जे भैमी चरणकमलेकामिन्हतेशर णोरक्षके अंबेवक्तुं कामादस्माद्विन्दतं युवासितिवदंतः यावद्गणना
घावत्संख्याकादिगंतात्सकाशाद्व्यंतिसमागमिष्यंति। विधिनापि तावत्पत्तावत्संख्याकारेखा एवात्र
चरणद्वंद्वे स्टष्ण निर्मिताः। एता अंगुलयो दशदिगंतानामपि दशसंख्याचादशभ्योपि दिग्भ्यः कामार्त्तान्
पाः आगमिष्यंतीति सूचनार्थं ब्रह्मणा दशरेखा एव निर्मिताः। रेखा इति पाठे अंगुलयो न भवंति किंतु
रेखा एवेत्यन्वयः॥ यावद्गणनाता। इत्यच्ययी भावः पंचम्या इति वचनाद्न्मभावाभावः॥१०५॥ नखानेव ३०

र्णयति ॥ प्रियेति। अन्यथा ऽस्यं देहः एतस्याः पदच्छद्मना चरणव्याजेन सरागपद्मसौभाग्यं रक्तोत्पलसौ
भाग्यं तस्य भाग्यलाभः कथं स्यात्। दशसंख्यत्वमीसमीचीनावयस्यत्वेन च विनैतच्चरणसेवा न लभ्यते। येन नत
वल्लिखात्तस्मादस्य साधु दशत्वं कृतमिति ज्ञायत इत्यर्थः। चंद्रपद्मयोर्विरोधाच्चंद्रोदये कमलस्य संको
चात्समीचीनावस्तत्वेन विना रक्तोत्पलसंबंधश्चंद्रस्य न युज्यते न सत्वं जातस्तस्य च रक्तत्वं लब्धं तस्मादे
तदनुमीयत इत्यर्थः। अन्योपि साधुदशत्वेनाप्राप्यमपि प्राप्नोति। दशापि वाणेन खाश्चंद्र इत्यादि इति
भावः॥ ६॥ अंगुष्ठनखौ च पुनः ष्टष्टस्के नव र्णयति॥ यशइति। या भैमी यशःकीर्त्तिःपदा अंगुष्ठनखौ मुखे
दुंदुत इंदुं पूर्णोडुवत्तुष्ठयं षोडशकलत्वं द्वंद्व वर्तुष्टयं विभर्त्ति तस्यां अस्यां तु श्रुत्विभैम्यां चतुरधिकाष
ष्टिःकलाः कथं नामवासंनो पैतु अपि तु प्राप्नोतीति युक्तमेतत्। षोडशकलत्वं द्वंद्वचतुष्टयधारणात्षो
डशकलाश्चतुर्गुणिताश्चतुःषष्टिर्भवंतीति युक्तमित्यर्थः। गीतवाद्यादिकलाप्रवीणेयमित्यर्थः॥
कलेति जात्येकवचनं। कलानां चतुःषष्टिरिति वा। कला इति पाठे कलाः स्वपाचतुःषष्टिरिति॥ १०७॥ च

वर्णयितुमशक्यमिति निगमयति॥ स्त्रैणेति॥ विधिर्नैव यं तावदादौ अतिविश्वा जितत्रैलोक्या स्त्रैणे:
ति सुंदरी स्त्रीकृतेत्यर्थः। अनंतरं यौवनेन तस्याप्यति विश्वसर्गस्यापि विधेर्या उपनिता शैशवसौंदर्यापे
क्षया धिकं सौंदर्यं प्रापिता। तारुण्यपतिसौंदर्यं भवति। ततोप्यनंतरं मनोभुवा कामेनैव दग्धत्वं सर्वव्या
पारत्वात्तुरीय अध्याप्यशिक्षयित्वा वाक्पथस्य पारं परतीरमेवापिना प्रापिता। वर्णयितुमशक्यत्वा
द्वागगोचर इत्यर्थः। अपचविद्या पारं प्रापितेत्यर्थः। मदनवशा रतिचतुरेयमित्यर्थः। अन्योपि प्र
ज्ञोध्यापितः सन्वाङ्मयस्य पारं प्राप्नोति॥१०८॥ तीति॥ स धराधिपः नलः सखीभिर्वृता भीमजा तस्या न
यनविषयीभावेन नयनगोचरत्वेनाचमभिलाषं दधार इदानीमात्मानं सखीसहितभैम्यै दर्शयिष्या
मीति तस्य बुद्धिरुत्पन्नेत्यर्थः। प्रकटो जात इति भावः। इंद्रवदानात् सखीसहितैव भैम्याङ्गस्थाने
न्यनकेन विश्वस्तेत्यभिप्रायः स्वचितः किं कुर्वन् इति पूर्वोक्तप्रकारेण चिकुरादारभ्य केशपाशमारभ्य
नखावधि नखपर्यंतं हरिणाक्षमणीवत्रैत्रयस्यास्तामनंगभैमीं वर्णयन्। तया वित्रां बुधौ अद्भुतसौंद

र्यद्दर्शनाद्वाष्पसमुद्गतरत्नवमानमेतत्तरमानसंयस्यसःसाश्चर्यः भैमीदर्शनाद्वहृदयस्यभरतोनपरि
पूरतोनोद्वेलः वेलोमर्यादांतीरंचातिक्रांतोऽतिवहलआनंदोयस्यसः॥ उद्वेलावनानंदस्यसमुद्गत्वंस्ववि
ता अन्यदप्युदकं गंभीरस्यीनंपरिपूर्यवहिर्निगच्छति आरभ्यार्थयोगेपीतिकेविदितिचुकुरादितिपं
चमी॥१०९॥ ॥श्रीहर्षमिति॥ गौडोर्वीशकुलस्य गौडदेशनृपालवंशस्य प्रशस्तिर्वर्णनातस्याभव
त्तिः रचनातस्यां भ्रातरि एव कर्त्रे कृत्वा तस्याप्ययं नरवितत्यर्थः वीरसेनचरितेयाकृणि महाकाव्येऽयं
सप्तमः सर्गोगमत्समाप्तिं प्राप्तः॥ भ्रातरीति भाषितपुंस्कं॥ ॥ इतिश्रीमन्नरसिंहपंडितात्मजनारायणा
कृतनैषधीयप्रकाशेसप्तमः सर्गः॥ ॥श्रीदुर्गादेव्यैनमः॥ श्रीवीतरागुप्तसहाय॥ ॥रामकृष्ण॥